श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्गोपालार्य महादेशिकैः अनुगृहीतम्

# ॥ श्री अपर्याप्तामृत ध्यान सोपानम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महादेशिकाय नमः

श्रीमते गोपालार्य महादेशिकाय नमः

# ॥ श्री अपर्याप्तामृत ध्यान सोपानम् ॥

श्रीकुम्भघोणपतिशार्ङ्गिनुतेश्च वैश्व-
देवाग्निनिर्णयत आगममौलिसूरेः।
नाम्नां सहस्रकृतितः कृतदासभाग्यं
गोपालदेशिकमहं शरणं प्रपद्ये॥

सत्यं ज्योतिः श्रुतिपरिषदां अप्रमेयं प्रमेयं
कल्याणानां अविकलगृहं पावनं पावनानाम्।
आविर्भूतं कनकसरितो दक्षिणे तीरभागे
शार्ङ्गशाख्यं विनतशरणं भातु चित्ते सदा मे॥ १ ॥

स्वर्णाम्भोजप्रतिममनघं श्री-धरा-वीक्षणानां
पेयं तृप्तेरवधिरहितं योगिनां चित्तलग्नम्।
दीनानाथव्यसनशमनं शार्ङ्गिणः पादयुग्मं
चित्ते भायादखिलहृदयानन्दकन्दं सदा मे॥ २ ॥

चित्राकारं कटकरुचिभिर्धर्मपुत्रस्य दूत्ये
गोपस्त्रीणां वसनहरणे दैत्यनाशार्थयाते।
बद्धस्नेहं मनसिजविभोः काहळाभं मनोज्ञं
जङ्घायुग्मं लसतु हृदये मामके शार्ङ्गपाणेः॥ ३ ॥

देवाराम प्रभवकदळी स्तम्भ सम्भाव्य शोभं
श्रीभूदेवि प्रभृति महिषी प्रार्थ्यमानोपधानम्।
काञ्चीनिर्यत् किरणरुचिरं पीतकौशेयजुष्टं
चित्ते लग्नं भवतु मम तच्छार्ङ्ग धन्वोरुयुग्मम्॥ ४ ॥

www.prapatti.com

स्फुरत्काञ्चीनद्धं कनककटिसूत्रेण च वृतं
विशालं विस्तीर्णं प्रवरगुणपीताम्बरयुतम्।
कटीदेशं शार्ङ्गप्रवरधनुषो लोचनयुगं
ममालोक्यप्रेम्णा निरवधिमहानन्दममभजत्॥ ५ ॥

क्वचित्काले स्वान्तर्निहितचिदचित्तत्त्वविततिः
बहूनां धातॄणां प्रभवकरणीभूतकमला।
गभीरा क्षीराब्धेर्गुरुतरमहावर्तसुभगा
शुभा नाभी संयग्लसतु हृदि मे शार्ङ्गिण इयम्॥ ६ ॥

रमावासस्थानं मणिवररुचा भास्वदनघं
महाहारोल्लासं निखिलजगदादिप्रकृतिभूः।
सुनद्धं सूत्रेण द्रुतकनकभास्वत् स्ववपुषा
सदा वक्षश्चित्ते मम लसतु शार्ङ्गाख्यधनुषः॥ ७ ॥

नतानां सर्वेषां परमहितविश्राणनपरं
सुवामं वामान्यं स्वभुजमुपधाय प्रमुदितम्।
भजे वामं बाहुं भुजगसदृशं जानुनिहितं
विधायानन्तेऽस्मिन् शयितमनघं शार्ङ्गिणमहम्॥ ८ ॥

मुग्धं वक्त्रं तुहिनकिरणस्पर्धि लावण्यगेहं
कल्याम्भोजप्रणयि नयनं कर्णसीमातिलङ्घि।
ओष्ठद्वन्द्वं स्थितमनुपमं कुन्तळं शार्ङ्गपाणेः
दृष्ट्वा दृष्ट्वा भजति न च मे लोचनं तृप्तिलेशम्॥ ९ ॥

नानारत्नप्रथितमहिमा श्रीमदापीढनद्धः
सर्वेशत्वप्रकटनचणो निर्मितोऽतुल्यहेम्ना।
माल्योन्नीतस्थिरपरिमळो वैदिकाख्ये विमाने
वासस्थाने हृदि लसतु मे शार्ङ्गिणस्तत्किरीटः॥ १० ॥

पादाम्भोजं प्रतिकलमहं शार्ङ्गिणो नौमि नित्यं
जङ्घाजानुप्रवरयुगळं संस्मरेयं ततोऽपि।

www.prapatti.com

ऊर्वोर्युग्मं तदनु महितं नाभिदेशं भुजौ द्वौ
वक्षो वक्त्रं तदिदमखिलं सुन्दरं निर्विशेयम्॥ ११ ॥

अग्रे पर्याप्तिहीनामृतमिति विदितं सुन्दरं स्वस्य रूपं
पार्श्वद्वन्द्वे च लक्ष्मीं भुवमपि महिषीं वीक्षमाणः स्वदृग्भ्याम्।
शृण्वन् श्रीनाभिपद्मप्रभवविधिमुखादुत्थितं वेदघोषं
गेहे श्रीवैदिकाख्ये हृदि च मम सदा शार्ङ्गधन्वा समास्ते॥ १२ ॥

श्रीमद्वैदिकसंज्ञिके दिविषदां मान्ये विमाने स्फुरत्-
श्रीमच्छार्ङ्गधरस्य संस्तुतिरियं गोपालसूर्यर्पिता।
भक्तिं यच्छति शार्ङ्गिणि प्रसृमरां कैङ्कर्यसिद्धिं तथा
नित्यं संपठतां अरोगसुखितापूर्वं च सन्मङ्गळम्॥ १३ ॥

॥ इति श्री अपर्याप्तामृत ध्यान सोपानम् संपूर्णम् ॥

www.prapatti.com